


# श्रीनृसिंहद्वादशनामस्तोत्रम्
# श्रीलक्ष्मीनृसिंहअष्टोत्तरशतनामस्तोत्रम्
# श्री शनैश्वरकृत नृसिंहाष्टकम्
# श्रीनृसिंह ऋणमुक्ती स्तोत्र

HPD

### श्री नृसिंहभक्तांसाठी ४ स्तोत्रांचा संग्रह

## ।। श्रीनृसिंहद्वादशनामस्तोत्रम् ।।

## ।। श्रीलक्ष्मीनृसिंहअष्टोत्तरशतनामस्तोत्रम् ।।

## ।। श्री शनैश्वरकृत नृसिंहाष्टकम् ।।

## ।। श्रीनृसिंह ''ऋणमुक्ती स्तोत्र ।।

**प्रकाशक**
श्री नृसिंह भक्त मंडळ प्रकाशन, नरसिंहपूर
ता. वाळवा, जि.सांगली

**डिझाईन :** विवेक मंद्रुपकर



HPD

## सिद्ध साधकांचे साधना क्षेत्र - नरसिंहपूर

श्रीक्षेत्र कोळे-नरसिंहपूर. एक प्राचीन तीर्थक्षेत्र. श्रीनृसिंहप्रभूचे अद्‌भुत मंदिर, श्रीकृष्णामाईचा क्षणभर स्तिमित करणारा विशाल जलाशय, श्रीसिद्धेश्वर महाराजांसारख्या सिद्धपुरुषांचे कल्याणप्रद आशीर्वाद या गावाला लाभलेले आहेत.

सांगली जिल्ह्यातील इस्लामपूर या तालुक्याच्या ठिकाणापासून उत्तरेस सुमारे तेरा किलोमीटर अंतरावर नरसिंहपूर वसले आहे. नाथ संप्रदायाचे संस्थापक मत्स्येंद्रनाथ यांच्या सिद्धी सामर्थ्याची प्रचीती देणारा, प्रसिद्ध मच्छिंद्रगड नरसिंहपूरला कुशीत घेऊन उभा आहे.

विठ्ठलभक्तसंप्रदायाचे प्रवर्तक आणि प्रचारक, संत नामदेव यांचे नरसिंहपूरशी अगदी पिढ्या पिढ्यांचे रक्ताचे नाते होते.

वैदिक, नाथपंथ, महानुभाव, भक्तिपंथ, समर्थपंथ अशा सर्व, भारतीय पारमार्थिक सांप्रदायांची प्रसादचिन्हें नरसिंहपूरच्या पंचक्रोशीत स्पष्टपणे दिसतात. भारतीय अध्यात्म तत्त्वज्ञान व साधना यातील एकात्मतेचा दिव्य साक्षात्कार नरसिंहपुरात श्रद्धावानांना होत राहतो.

**श्री नृसिंह भक्त मंडळ प्रकाशन, नरसिंहपूर**
**ता. वाळवा, जि.सांगली**

# ॥ श्रीनृसिंहद्वादशनामस्तोत्रम् ॥

प्रणम्य शिरसा देवं नृसिंहं भक्तवत्सलम् ॥
सच्चिदानंदरूपोयं परिपूर्ण जगद्गुरूम् ॥

अस्य श्रीलक्ष्मीनृसिंहद्वादशनामस्तोत्रमंत्रस्य ।
पुरंदर ऋषिः । श्रीलक्ष्मीनृसिंहो देवता ।
अनुष्टुप् छंदः । क्ष्रौम्बीजं । ॐ श्री शक्तिः ।
ॐ श्रीलक्ष्मीनृसिंहप्रीत्यर्थेजपे विनियोगः ।

**अथ न्यासः**

ॐ क्ष्रां अंगुष्ठाभ्यां नमः ।
ॐ क्ष्रीं तर्जनीभ्यां नमः ।
ॐ क्ष्रूं मध्यमाभ्यां नमः ।
ॐ क्ष्रैं अनामिकाभ्यां नमः ।
ॐ क्ष्रौं कनिष्ठिकाभ्यां नमः ।

ॐ क्ष्रः करतलकरपृष्ठाभ्यां नमः ।
ॐ क्ष्रां हृदयाय नमः । ॐ क्ष्रीं शिरसे स्वाहा ।
ॐ क्ष्रूं शिखायै वषट् । ॐ क्ष्रैं कवचाय हुं ।
ॐ क्ष्रौं नेत्रत्रयाय वौषट् ।
ॐ क्ष्रः अस्त्राय फट् ।

## अथ ध्यानम्

लक्ष्मीशोभितवामभागममलं सिंहासने सुंदरम्
सव्ये चक्रधरं च निर्भयकरं वामेन चापं वरम् ।
सर्वाधीशकृतांतपत्रममलं श्रीवत्सवक्षःस्थलं
वंदे देवमुनींद्रवंदितपदं लक्ष्मीनृसिंहं विभुम् ॥

प्रथमं तु महाज्वालो व्दितीयं उग्रकेसरी ।
वज्रनखस्तृतीयं तु चतुर्थंतु विदारणः ॥
सिंहास्यः पंचमं चैव षष्ठं कशिपुमर्दनः ।
सप्तमं रिपुहंता च अष्टमं देववल्लभः ॥

प्रल्हादराजो नवमं दशमं द्वादशात्मकः ।
एकादशं महारूद्रो द्वादशं करूणानिधिः ॥
एतानि द्वादश नामानि नृसिंहस्य महात्मनः ।
मंत्रराजेति विख्यातं सर्वपापहरं शुभम् ॥
ज्वरापस्मारकुष्टादितापज्वरनिवारणं ।
राजद्वारे तथा मार्गे संग्रामेषु जलांतरे ॥
गिरिगव्हरगोरव्ये व्याघ्रचोरमहोरगे ।
आवर्तनं सहस्त्रेषु लभते वांछितं फलम् ॥

इति श्रीब्रह्मपुराणे ब्रह्मनारदसंवादे श्रीलक्ष्मीनृसिंह
द्वादशनामस्तोत्रम् संपूर्णम् ।

श्रीलक्ष्मीनृसिंहार्पणमस्तु ।



# ॥ श्रीलक्ष्मीनृसिंहअष्टोत्तरशतनामस्तोत्रम् ॥

अस्यश्रीलक्ष्मीनृसिंह

अष्टोत्तरशतदिव्यनामस्तोत्रमंत्रस्य

श्रीनारायण ऋषिः । श्रीनृसिंहो देवता ।

अनुष्टुप् छंदः ।

श्रीनृसिंहप्रसादसिद्ध्यर्थे जपे विनियोगः ।

ॐ श्रीनृसिंहः पुष्कराक्षः करालविकृताननः ।
हिरण्यकशिपोर्वक्षोविदारणनखांकुशः ॥१॥
प्रल्हादवरदः श्रीमानप्रमेयपराक्रमः ।
अभक्तजनसंहारी भक्तानामभयप्रदः ॥२॥
ज्वालामुखस्तीक्ष्णकेशस्तीक्ष्णदंष्ट्रो भयंकरः ॥
उत्तप्तहेमसंकाशसट। धूतबलाहकः ॥३॥
त्रिनेत्रकपिलः प्रांशु सोमसूर्याग्निलोचनः ।
स्थूलग्रीवः प्रसन्नात्मा जांबूनदपरिधृतः ॥४॥

व्योमकेशः प्रभृतिभिस्त्रिदिवेशैरभिष्टुतः ।
उपसंहृतसप्तार्चिः कवलीकृतमारूतः ॥५॥
दिग्गजावलिदर्पघ्नः कद्रूजविषनाशनः ।
अभिचारः क्रियाहंता ब्रह्मण्यो भक्तवत्सलः ॥६॥
समुद्रसलिलत्राता हलाहलविशीर्णकृत् ।
ओजः प्रपूरिताशेषचलाचलजगत्त्रयः ॥७॥
हृषीकेशो जगत्त्राणः सर्वगः सर्वकामदः ।
नास्तिकप्रत्ययार्थाय दर्शितात्मा प्रभाववान् ॥८॥
हिरण्यकशिपोरग्रे सभास्तंभसमुद्भवः ।
उग्रोग्निज्वालमाली च सुतीक्ष्णो भीमदर्शनः ॥९॥
दग्धाखिलजगज्जंतुकारणं जगतामपि ।
आधारः सर्वभूतानां ईश्वरः सर्वहाटकः ॥१०॥
विष्णुर्जिष्णुर्जगत्धामबहिरंतः प्रकाशकः ।
योगिहृत्पद्ममध्यस्थो योगो योगविदुत्तमः ॥११॥
स्त्रष्टा हर्ता जगत्त्राता व्योमरूपी जनार्दनः ।
चिन्मयः प्रकृतिः साक्षी गुणातीतो गुणाश्रयः ॥१२॥

मखविच्छेदकृत्कर्ता सर्वपाशविनिस्मृतः ।
व्यक्ताव्यक्तःस्वरूपो यः सूक्ष्मसदसदात्मकः ॥१३॥
अव्ययंः शाश्वतोऽनंतो वीरजित्परमेश्वरः ।
मायावी मरूदाधारो निमिषोऽक्षर एव च ॥१४॥
अनादिनिधनो नित्यःपरब्रह्माभिधायकः ।
शंखचक्रगदाशार्ङ्ग प्रकाशितचतुर्भुजः ॥१५॥
पीतांबरधरः स्त्रग्वी कौस्तुभाभरणोज्वलः ।
श्रियाद्यासितवामांगश्रीवत्सेन विराजितः ॥१६॥
प्रसन्नवदनः शांतो लक्ष्मीप्रियपरिग्रहः ।
वासुदेवो महादेवो वाक्यपुष्पप्रपूजितः ॥१७॥
उद्युक्ताहवहुंकारभीषिताखिलदिङ्मुखः
गर्जन्वीरासमासीनः कठोरकुटिलेक्षणः ॥१८॥
दैत्येयः क्षतवक्षोसृग् आर्द्रीकृतनखायुधः ।
अशेषप्राणिभयदः प्रचंडो दंडतांडवः ॥१९॥

निटिलसृतघर्माम्बुसंभूतज्वलिताननः ।
वज्रसिंहो महामूर्तिर्भीमो भीमपराक्रमः ॥२०॥
स्वभक्तार्पितकारूण्यो बहूक्तो बहुरूपधृक् ।
एवं अष्टोत्तरशतं नाम्ना नरसिंहरूपिणः ॥२१॥
नरकेसरिणा दत्तं स्वप्ने शेषाय धीमते ।
आयुरारोग्यसंपत्तिः पुत्रपौत्रप्रवर्धन् ॥२२॥

इति श्रीब्रम्हांडपुराणे
श्रीनृसिंहअष्टोत्तरशतनामस्तोत्रं संपूर्णम् ।

# ।। श्री शनैश्वरकृत नृसिंहाष्टकम् ।।

।। श्री गणेशाय नमः ।। श्री शनैश्चराय नमः ।।
श्रीलक्ष्मीनृसिंहाय नमः

।। श्रीशनैश्चरकृत नृसिंहाष्टक प्रारंभः ।।

ॐ यत्पादपंकजरजः पद्मादरेण संसेवितं सकल-
कल्मषराशिनाशम् ।।

कल्याणकारणमशेष-निजानुगानां ।।
सत्त्वं नृसिंह मयि देहि कृपावलोकम् ।।१।।
सर्वत्र चंचलतया स्थितयापि लक्ष्म्या
ब्रह्मादिवंद्यपदया स्थिरयान्य-सेवी ।।
पादारविंदयुगुलं परमादरेण ।।
सत्त्वं नृसिंह मयि देहिकृपावलोकम् ।।२।।

यद्रूपमागमशिरः प्रतिपाद्यमाद्यमाध्यात्मिकादि
परितापहरं विचिंत्यम् ॥
योगीश्वरैरपगताखिलदोषसंघैः ॥
सत्त्वं नृसिंह मयि देहिकृपावलोकं ॥३॥
प्रल्हादभक्तवचसा हरिराविरासीत् ॥
स्तंभेहिरण्यकशिपुंय उदारभावः ॥
ऊर्वोनिधाय तदुदरो नखरैर्ददार ॥
सत्त्वं नृसिंह मयि देहिकृपावलोकम् ॥४॥
योनैजभक्त मनलांबुधिभूधरोग्र श्रृंगप्रपात
विषदंतसरीसृपेभ्यः ॥
सर्वात्मकः परमकारूणिकोरक्ष सत्त्वं नृसिंह मयि
देहिकृपावलोकम् ॥५॥
यन्निर्विकार पररूपविचिंतनेन ॥
योगीश्वरा विषयावीत समस्तरागाः ॥
विश्रांतिमापुर विनाशक्ती पराख्यां
सत्त्वं नृसिंह मयि देहिकृपावलोकम् ॥६॥

यद्रूपमुग्रमरिमर्दनभावशाली संचिंतनेन
सकलाभवभीतिहारी
॥भूतज्वरग्रहसमुद्भवभीतिनाशं ॥
सत्त्वं नृसिंह मयि देहिकृपावलोकम् ॥७॥
यस्योत्तमं यशउमापतिमग्रजन्म
शक्रादिदैवतसभासुसमस्तगीतम् ॥
श्रूत्वैक सर्व शमलप्रशमेकदक्षं ॥
सत्त्वं नृसिंह मयि देहिकृपावलोकम् ॥८॥
श्रीकृष्ण उवाच ॥ एवं श्रुत्वा स्तुतिंदेवः शनिना
कल्पितां हरिः॥ उवाच्यथंब्रह्मवृन्दस्य शनि
सद्भक्तवत्सलः ॥ श्रीनृसिंहउवाच ॥
प्रसन्नोहं शने तुभ्यं वरंवरय शोभनम् ॥

## शनिरुवाच

॥ नृसिंह त्वं मयि कृपां कुरु देवदयानिधे ॥

मद्वासरस्तवप्रीतिकरस्याद्देवतापते ।। मत्कृतं
त्वत्स्तवं येवै श्रुण्वतिच पठतिच ।। सर्वान् कामान्
पूरयेथांतेषां त्वं लोकभावना ।। श्रीनृसिंहउवाच ।।
तथैवास्तु शनेहं वै रक्षोभुवनमास्थित: ।।
भक्तकामान् पूरयिष्ये त्व ममैक वचश्रुणु ।।
त्वत्कृतं मत्परंस्तोत्रं य: पठेत्त छ्रुणोतिय: ।।
द्वादशाष्टम जन्मस्थं त्वद्‌भयं नास्ति तस्यवै ।।
इति

श्रीमग्दंगामहात्मे रक्षोभुवनप्रस्तावे
श्रीमद्दिव्यलक्ष्मीनृसिंह स्तुतिर्नाम नवमोध्याय: ।।

श्रीमद्दिव्य लक्ष्मीनृसिंहार्पणमस्तु ।।
श्रीकृष्णार्पणमस्तु ।

# ॥ श्रीनृसिंह "ऋणमुक्ती स्तोत्र ॥

देवता कार्य सिद्धर्थम् सभास्तंभ समुधितम् ।
श्री नृसिंह महावीरम् नमामि ऋणंमुक्तये ॥१॥
लक्ष्म्यालिंगित वामांगम् भक्तानाम् अभयप्रदम् ।
श्री नृसिंह महावीरम् नमामि ऋणमुक्तये ॥२॥
सिंह नादेन महता दिगदंति विदारणम् ।
श्री नृसिंह महावीरम् नमामि ऋणमुक्तये ॥३॥
प्रल्हाद वरदं श्रीशं दैत्यैश्वरं विदारणम् ।
श्री नृसिंह महावीरम् नमामि ऋणमुक्तये ॥४॥
आंग मालाधरं शंखचक्रायुध धारिणम् ।
श्री नृसिंह महावीरम् नमामि ऋणमुक्तये ॥५॥

स्मरणात सर्व पापघ्नं कद्रुज विषशोधनम् ।
श्री नृसिंह महावीरम् नमामि ऋणमुक्तय ॥६॥
कोटी सूर्य प्रतिकाशं अभिचार विनायनम् ।
श्री नृसिंह महावीरम् नमामि ऋणमुक्तय ॥७॥
वेदवेदान्त यज्ञेशं ब्रह्मरुद्रादि शंसितम् ।
श्री नृसिंह महावीरम् नमामि ऋणमुक्तय ॥८॥

श्री मद् वादिराज पूज्यचरणदृष्टं नृसिंहपूराणोक्त स्तोत्र सायंकाळी देवापुढे सांजवात लावून प्रार्थनापूर्वक एकवीस वेळा पठण करावे, प्रचिती येते.

**भानुतुकदेव त्याचा पुत्र गोपाळ भास्कर त्याचा पुत्र भानू गोपाळ**

**आता जरुरी आहे आपल्या सहभागाची !**

